क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् ॥
अरण्यांश्च पशून् सर्व्वान् दंष्ट्रिणश्च वयांसि च।
मद्यं नीलीञ्च लाक्षाञ्च सर्व्वांश्चैकशफांस्तथा ॥
काममुत्पाद्य कृष्यान्तु स्वयमेव कृषीवलः ।
विक्रीणीत तिलान् शुद्धान् धर्म्मार्थमचिर-
स्थितान् ॥"
इति मानवे १० अध्यायः ॥

विक्लवः, त्रि, ( विक्लवते इति । वि + क्लु + पचाद्यच् । ) विह्वलः । इत्यमरः ॥ ( यथा, माघे । १२ । ६३ ।
"नूनं सहायेन वियोगविक्लवा
पुरः पुरस्त्रीरपि निर्ययौ तदा ॥" * ॥
क्ली, दुःखम् । यथा, रामायणे । २।४४।२५ ।
"किमिदानीमिदं देवि! करोति हृदि विक्लवम् ॥")

विक्लिन्नः, त्रि, (वि + क्लिद् + क्तः ।) जरसा जीर्णः । शीर्णः । आर्द्रः । इति मेदिनी । ने, १३३ ॥

विक्षतः, त्रि, (वि + क्षण + क्तः ।) विशेषेण क्षतः । ( यथा, महाभारते । २ । ४८ । ३३ ।
"अङ्गारेण विनिर्गच्छन् द्वारसंस्थानरूपिणा ।
अभिहत्य शिलां भूयो ललाटेनास्मि विक्षतः ॥")

विक्षावः, पुं, ( विक्षवणमिति । वि + क्षु + "वौ क्षुश्रुवः ।" ३ । ३ । २५ । इति घञ् ।) शब्दः । इत्यमरः ॥ ( यथा, भट्टिः । ७ । २६ ।
"यात यूयं यमश्रायं दिशं नायेन दक्षिणाम् ।
विक्षावैस्तोयविश्रावं तर्ज्जयन्तो महोदधेः ॥")
कासः । इति स्वामिकलिङ्गौ । इति भरतः ॥

विक्षिप्तः, त्रि, ( वि + क्षिप् + क्तः । ) व्यक्तः । ( यथा, महाभारते । १ । २७ । ७ ।
"वायुविक्षिप्तकुसुमैस्तथान्यैरपि पादपैः ॥"
कम्पितः । यथा, भागवते । ८ । ८ । ४६ ।
" स व्रीड़स्मितविक्षिप्तभ्रूविलासावलोकनैः ।
दैत्ययूथपचेतःसु काममुद्दीपयन् मुहुः ॥"
क्ली, चित्तवृत्तिविशेषः । यथा, पातञ्जलभाष्ये ।१।
"क्षिप्तं मूढ़ं विक्षिप्तमेकाग्रनिरुद्धमितिचित्तभूमयः ।" "क्षिप्ताद्विशिष्टं विक्षिप्तमितिमणिप्रभा ।" )

विक्षीरः, पुं, ( विशिष्टं क्षीरं यत्र । ) अर्कवृक्षः । इति राजनिर्घण्टः ॥

विक्षेपः, पुं, ( वि + क्षिप् + घञ् । ) प्रेरणम् । त्यागः । विक्षेपणम् । यथा,—
"नैष्कर्म्यामिषुविक्षेपमतीत्य ह्यधिकं सुखम् ।"
इत्याद्याह्निकाचारतत्त्वम् ॥
( कम्पनम् । यथा, कुमारे । १ । १३ ।
"लाङ्गूलविक्षेपविसर्पिशोभै-
रितस्ततश्चन्द्रमरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं
कुर्व्वन्ति वालव्यजनैश्चमर्यः ॥")
अद्वितीयवस्त्ववलम्बनेन चित्तस्य अन्यावलम्बनम् । इति वेदान्तसारः ।

विक्षेपशक्तिः, स्त्री, ( विक्षेपाय शक्तिः । ) मायाशक्तिः । यथा । रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयति । एवं अज्ञानमपि स्वावृतात्मनि तथा विक्षेपशक्त्या आकाशादिप्रपञ्चमुद्भावयति तादृशं सामर्थ्यम् । इति वेदान्तसारसुबोधिनीटीका ॥

विखः, त्रि, ( विख्यः । निपातनात् यलोपः । ) गतनासिकः । इति भरतद्विरूपकोषः ॥

विखनाः, [स्] पुं, ब्रह्मा । यथा,—
"न खलु गोपिकानन्दनो भवा-
नखिलदेहिनामन्तरात्मदृक् ।
विखनसार्थितो विश्वगुप्तये
सख उदेयिवान् सात्वतां कुले ॥"
इति श्रीभागवते । १० । ३१ । ४ ॥

विखुः, त्रि, ( विगता नासिका यस्य । बहुलवचनात् नासिकायाः खुः । ) गतनासिकः । इति भरतद्विरूपकोषः ॥

विखुरः, पुं, राक्षसः । इति त्रिकाण्डशेषः ॥ चौरः । इति संक्षिप्तसारोणादिवृत्तिः ॥

विख्यः, त्रि, ( विगता नासिकास्येति । "ख्यश्च ।" ८ । ४ । २८ । इत्यस्य वार्त्तिकोक्त्या नासिकायाः ख्यः । ) गतनासिकः । इति केचित् ॥

विख्यातः, त्रि, ख्यातिापन्नः । विपूर्व्वख्याधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । १ । ६७ । ३२ ।
"चन्द्रवर्म्मेति विख्यातः काम्बोजानां नराधिपः ॥")

विख्यातिः, स्त्री, प्रसिद्धिः । सुख्यातिः । विपूर्व्वख्याधातोः क्तिप्रत्ययेन निष्पन्नः ॥

विख्यापनं, क्ली, ( वि + ख्या + णिच् + ल्युट् । ) व्याख्यानम् । विपूर्व्वण्यन्तख्याधातोरनट्प्रत्ययेन निष्पन्नम् ॥

विग्रः, } विग्रुः, } त्रि, ( विगता नासिका यस्य । "ग्र-ग्रौ च वक्तव्यौ ।" इति नासिकाया ग्रः ग्रुश्च । ) अनासिकः । इति हेमचन्द्रः ॥ छिन्ननासिकः । इति शब्दरत्नावली ॥

विगणनं, क्ली, ( वि + गण + ल्युट् ।) ऋणमुक्तिः । इति त्रिकाण्डशेषः ॥ ( यथा, पाणिनिः । १ । ३ । ३६ ।
"संमाननोत्सञ्जनाचार्य्यकरणज्ञानभृतिविगणनव्ययेषु नियः ॥" "विगणनं ऋणादेर्निर्यातनम् ।" इति काशिका ॥ )

विगतः, त्रि, ( वि + गम + क्तः । ) प्रभारहितः । तत्पर्य्यायः । निष्प्रभः २ अरोकः ३ । इत्यमरः ॥ वीतः ४ । इति रुद्रः ॥ विशेषेण गतः । इति हेमचन्द्रः ॥ ( यथा, माघे । ११ । २६ ।
"विगततिमिरपङ्कं पश्यति व्योम यावत्
धुवति विरहखिन्नः पक्षती यावदेव ।
रथचरणसमाह्वस्तावदौत्सुक्यनुन्ना
सरिदपरतटान्तादागता चक्रवाकी ॥")

विगतश्रीकः, त्रि, श्रीरहितः । विगता श्रीर्यस्य इति बहुव्रीहौ कप्रत्ययेन निष्पन्नः ॥

विगतार्त्तवा, स्त्री, (विगतं आर्त्तवं रजो यस्याः ।) पञ्चपञ्चाशदब्देभ्य ऊर्द्ध्वं निवृत्तरजस्का । तत्पर्य्यायः । निष्कली २ निष्कला ३ निष्कलो ४ निष्फला ५ विकली ६ विकला ७ । इति शब्दरत्नावली ॥

विगमः, पुं, ( वि + गम + "ग्रहवृदृनिश्चिगमश्च ।" ३ । ३ । ५८ । इति अप् । ) नाशः । यथा । एकदण्डिनो वेदान्तिनस्तु यदुपाध्यनवच्छिन्नस्य ब्रह्मणो विशुद्धरूपता तादृशोपाधिविगम एव कैवल्यम् । त्रिदण्डिनस्तु आनन्दमयपरमात्मनि जीवात्मनो लयो मोक्षः । जीवात्मपरमात्मनोरभेदेऽपि उपाधिविशेषविशिष्टस्यात्मनो जीवरूपतया तस्यौपाधिकः परमात्मभेदः । इति भेदकोपाधिविगम एव जीवस्य परमात्मनि लयः । यथा घटाकाशस्य घटविगम एव शुद्ध आकाशे तस्य लयः । लिङ्गशरीरावच्छिन्नस्यैवात्मनो जीवभाव इति लिङ्गशरीरनाश एव पर्य्यवसितो मोक्षः । इति मुक्तिवादः ॥ ( विच्छेदः । यथा, भागवते । १ । १३ । ४३ ।
"यथा क्रीड़ोपस्कराणां संयोगविगमाविह ।
इच्छया क्रीड़ितुः स्यातां तथैवेशेच्छया
नृणाम् ॥")

विगन्धकः, पुं, (विरुद्धो गन्धो यस्मिन् । बहुव्रीहिलक्षणः कः ।) इङ्गुदीवृक्षः । इति राजनिर्घण्टः ॥

विगन्धिका, स्त्री, हपुषा । इति राजनिर्घण्टः ॥

विगर्हणं, क्ली, ( वि + गर्ह + ल्युट् । ) निन्दनम् । भर्त्सनम् । ( यथा, हरिवंशे । ७८ । २३ ।
"कृष्णे च भवतो द्वेष्ये वसुदेवविगर्हणात् ॥")

विगर्हणा, स्त्री, ( वि + गर्ह + णिच् + युच् । टाप् ।) निन्दनम् । भर्त्सनम् । (यथा, महाभारते । १२ । ११४ । २१ ।
"विगर्हणां परमदुरात्मना कृतां
सहेत यः संसदि दुर्ज्जनान्नरः ॥")

विगर्हितः, त्रि, ( विशेषेण गर्हितः । ) निन्दितः । ( यथा, नैषधे । १ । १३१ ।
"न केवलं प्राणिवधो वधो मम
त्वदीक्षणाद्विश्वसितान्तरात्मनः ।
विगर्हितं धर्म्मधनैर्निवर्हणं
विशिष्य विश्वासजुषां द्विषामपि ॥")
निषिद्धः । इति विपूर्व्वगर्हधातोः क्तप्रत्ययेन निष्पन्नः ॥

विगलितः, त्रि, ( विशेषेण गलितः । ) स्खलितः । यथा, गीतगोविन्दे ५ सर्गः ।
"विगलितवसनं परिहृतरसनं
घटय जघनमपिधानम् ।
किशलयशयने पङ्कजनयने
निधिमिव हर्षनिधानम् ॥"

विगाढ़ः, त्रि, ( विगाह्यते स्मेति । वि + गाह + क्तः । ) स्नातः । अवगाहितः । विपूर्व्वगाहधातोः क्तप्रत्ययेन निष्पन्नः ॥ ( प्रगाढ़ः । यथा, महाभारते । ३ । ४६ । ५ ।
"निर्गम्य चन्द्रोदयने विगाढ़े रजनीमुखे ।
प्रस्थिता सा पृथुश्रोणी पार्थस्य भवनं प्रति ॥")

विगानं, क्ली, ( विरुद्धं गानं परस्य । ) निन्दा । इति हेमचन्द्रः ॥